MID TERM EXAM-(2023-2024) **Sample paper** SUBJECT: SANSKRIT

**CLASS-**X

**Time: 3** hours **MM:80**

सामान्यनिर्देशा: –
१) कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 08 पृष्ठानि मुद्रितानि सन्ति।
२) 16प्रश्ना: च सन्ति।
३) अस्मिन् प्रश्नपत्रे चत्वार: खण्डा: सन्ति।
४) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
५) उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्क: अवश्यं लेखनीय:।
६) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
७) प्रश्नानां निर्देशा: अवश्यं पठनीया:।

**प्रश्नपत्रस्वरूपम्-**

| | | |
|---|---|---|
| **'क' भाग:** | **: अपठितावबोधनम्** | **१० अङ्का:** |
| **'ख' भाग:** | **: रचनात्मककार्यम्** | **१५ अङ्का:** |
| **'ग' भाग:** | **: अनुप्रयुक्तव्याकरणम्** | **२५ अङ्का:** |
| **'घ' भाग:** | **: पठितावबोधनम्** | **३० अङ्का:** |

## 'क' भाग: अपठितावबोधनम्- १० अङ्का:

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत-**

भारतवर्षे सर्वासु वनस्पतिषु तुलसी-पादप: आदरेण सह पूज्यते। अयं पादप: असंख्यकै: गुणै: सम्पन्न: अस्य काष्ठं पत्राणि च स्वास्थ्यकारीणि रोगरोधकानि आयुवर्धकानि च विद्यन्ते। तुलसी तु भगवत: विष्णो: प्रिया सहचरी। अत: एव सा 'विष्णुकान्ता' 'केशवप्रिया' 'विष्णुप्रिया' आदिभि: नामभि: अपि प्रसिद्धा। तुलस्या: अपरं प्रमुखं नाम 'वृन्दा' एव अस्ति। अस्या: तुलस्या: महिमा चिकित्साक्षेत्रे अपि गरीयसी। प्रभातवेलायां प्रथमं तुलसीपत्राणां सेवनं हृदयरोगे लाभकारी भवति। तुलस्या: निर्मित: क्काथ: कफजन्यदोषं कासं च दूरीकरोति। तुलसीपत्राणि यदि जले निक्षिप्य तेन जलेन स्नायते तत् तु त्वक्-रोगान् नाशयति। कृष्णस्य लीलाक्षेत्रे वृन्दावने सर्वत्र वृन्दाया: एव पादपा: आसन् अत: एव तत्स्थानं वृन्दावनम्। प्रत्येकं गृहे सुलभ: अस्या: पादप:। तस्यै तुलस्यै नम:।

**I. एकपदेन उत्तरत-(प्रश्नद्वयम्)** 1 × 2 = 2

i) क: आदरेण सह पूज्यते?
ii) कस्यै नम:?
iii) तुलस्या: महिमा कस्मिन् क्षेत्रे अपि गरीयसी?

**II. पूर्णवाक्येन उत्तरत-(प्रश्नद्वयम्)** 2 × 2 = 4

i) तुलसीपत्राणां सेवनं कस्मिन् लाभकारी भवति?
ii) कृष्णस्य लीलाक्षेत्रस्य नाम कथं वृन्दावनं जातम्?
iii) तुलसी-जलेन स्नायते तर्हि तत् कान् नाशयति?

**III. अनुच्छेदस्य कृते उचितं शीर्षकं लिखत-** 1 × 1 = 1

**IV. भाषिकं कार्यम्-(केवलं प्रश्नत्रयम्)** 1 × 3 = 3

i) ''सर्वासु वनस्पतिषु तुलसी-पादप: आदरेण सह पूज्यते' अत्र "वनस्पतिषु" पदस्य किं विशेषणम्?

क) सर्वासु ख) तुलसी-पादप: ग) आदरेण घ) पूज्यते'

ii) ''क्वाथ: कफजन्यदोषं कासं च दूरीकरोति' अस्मिन् वाक्ये कर्तृपदं किम्?

क) कफजन्यदोषम् ख) कासम् ग) क्वाथ: घ) दूरीकरोति

iii) 'हानिकारी' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम्?

क) सहचरी ख) गरीयसी ग) लाभकारी घ) नाशयति

iv) 'तुलसी' इति पदस्य प्रमुखं पर्यायपदं किम्?

क) वृन्दा ख) केशवप्रिया ग) विष्णुप्रिया घ) विष्णुकान्ता'

## 'ख'भाग:(लेखनकौशलम्)

**2. पत्रलेखनम्-** भवान् सोम:। भवत: अनुज: श्याम: मतदानं न करोति। तं प्रति अधोलिखितपत्रे रिक्तस्थानानि, मञ्जूषाया: साहाय्येन पूरयित्वा पुन: उत्तरपुस्तिकायां लिखत- ½ ×10 = 5

दिल्लीनगरम्

i) ..........

दिनांक:-15/9/2022

प्रिय अनुज श्याम!

ii) .......... भव।

अत्र सर्वं कुशलम्। तत्रापि कुशलं कामये। अनुज! iii) .......... जानासि एव यत् अस्माकम् देशे iv) .......... शासनं विद्यते। तदनुसारम् अस्माकम् एकं महत्वपूर्णम् v) .......... अस्ति। यदा सभ्या: जना: योग्याय मतदानं न कृत्वा अविचार्य वा मतदानं कुर्वन्ति तदा vi) .......... ये राजनेतार: तिष्ठन्ति, ते जनान् शोषयन्ति। स्वलाभार्थम् vii) .......... निमग्ना: भवन्ति। अत: viii) .......... अपि दायित्वम् अस्ति इति विचार्य मतदानं ix) .......... करणीयम्।

तव अग्रज:

x) .......... ।

| |
|---|
| **मञ्जूषा-** अस्माकम्, लोकतन्त्रदेशे, त्वम्, दायित्वम्, अवश्यं, उत्तमनगरत:, आयुष्मान्, लोकतन्त्रात्मकम्, भ्रष्टाचारे, सोम: |

**3. चित्रं दृष्ट्वा शब्दानां साहाय्येन च संस्कृतेन पञ्चवाक्येषु चित्रवर्णनं कुरुत-** 1 × 5 = 5



**मञ्जूषा**-[ग्रामः, कृषकः, करोति, कृषिकार्यम्, द्वौ, जनौ, हलकार्यम्, पश्यतः, दृश्यम्, सूर्यः, मनोहरम्, उदेति, वृषभौ, कर्षतः]

अथवा

"क्रीडानाम् उपयोगिता " विषयम् अधिकृत्य मञ्जूषाया: सहायतया पञ्चवाक्यात्मकम् अनुच्छेदं लिखत-

[क्रीडाक्षेत्रे, क्रीडन्ति, क्रीडनेन, स्वाथ्यम्, आरोग्यम् , शरीरम्, सुन्दरम्, धनम्,, हस्तौ, मुखम्, पादौ, बलिष्ठौ, साधनम्, करोति, भवति , अस्ति,क्रीडकस्य , एषः, परिश्रमम् ]

4. **अधोलिखित-हिन्दी-वाक्यानाम् अनुवादं संस्कृतभाषायां कुरुत- (केवलं ५)** 1 x 5 = 5

i) बालिका पानी पीती है। ii) मैं घर जाऊंगा।
iii) दो बालक पढते हैं। iv) गोपाल गीत गाता है।
v) तुम विद्यालय जाते हो। vi) तुम लोग श्लोक पढोगे।
vii) वह महिला भोजन करती है।

**'ग'-भाग: (अनुप्रयुक्तव्याकरणम्)**

5. **सन्धि शब्दांकन मेलनं कुरुत। 1x5=5**

6. **प्रदत्तविकल्पेभ्य: समुचितं कालबोधकशब्दं चिनुत-** 1 x 5= 5

i) आचार्य: प्रात: (4:00) ..............भ्रमणं करोमि।
अ) सार्ध-पञ्चवादने (ब) सपाद-चतुर्वादने (स) चतुर्वादने (द) पादोन-पञ्चवादने
ii) माधव: प्रात: (6:00).................. जागर्ति।
अ) सार्ध-षड्वादने (ब) सपाद-षड्वादने (स) सप्तवादने (द) षड्वादने
iii) सौम्या प्रात: (6:45)............. विद्यालयं गच्छति।
अ) सार्ध-सप्तवादने (ब) सपाद-सप्तवादने(स) पादोन-सप्तवादने (द) अष्टवादने
iv) सायं (4:30)....................प्रतिभा अतिरिक्तकक्षायै गच्छति।
अ) सार्ध-चतुर्वादने (ब) सपाद-चतुर्वादने (स) पादोन-चतुर्वादने (द) चतुर्वादने
v) विवेक: रात्रौ (8:15)................ भोजनं करोति।
अ) सार्ध-अष्टवादने (ब) सपाद-अष्टवादने (स) पादोन-नववादने(द) नववादने

7. **वाक्यानुसारं उचितम् अव्ययपदं चिनुत- (केवलं ३)** 1 x 5 = 5

i) छात्रा: ............. गुरून् नमन्ति।

अ) श्वः (ब) अधुना (स) ह्यः (द) परश्वः

ii) उत्सवः.................भविष्यति?

अ) श्वः (ब) कुत्र (स) ह्यः (द) अद्य

iii) सः ............. आगतः?

अ) श्वः (ब) च (स) वृथा (द) कदा

iv) लता गीता............. आपणं गच्छतः।

अ) च (ब) अपि (स) वृथा (द) ह्यः

V. रामः कृष्णः .............धनं गच्छतः।

अ) एवं ब) च स) तथा द) वा

8. **वाक्येषु रेखाङ्कितपदस्य शुद्धं विकल्पं चिनुत-(केवलं प्रश्नत्रयम्)** 1 x 5 = 5

i) लतायाम् **<u>अनेकाः</u>** पुष्पाणि सन्ति।

अ) अनेके (ब) अनेकानि (स) अनेकम् (द) अनेके

ii) **<u>अहं</u>** चित्रं पश्यसि।

अ) सः (ब) त्वम् (स) ते (द) यूयम्

iii) वृक्षाः परोपकाराय **<u>फलति</u>**।

अ) फलतः (ब) फलति (स) फलन्ति (द) फलथ

iv) श्वः वर्षा **<u>अस्ति</u>**।

अ) भवति (ब) आसीत् (स) अस्ति (द) भविष्यति

v) वाटिका अतीव **<u>मनोरमः</u>** अस्ति।

अ) मनोरमा (ब) मनोरमः (स) मनोरमम् (द) जीवम्मरणं

**9.निम्न समानार्थ शब्दांनां मेलनं कुरुत 1x5=5**

## खण्डः -घ'

## पठित-अवबोधनम्-(15अङ्काः)

**10. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-**

सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्ट्यात् पुत्रौ चपेटया प्रहृत्य जगाद-"कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः? अयमेकस्तावद्विभज्य भुज्यताम्। पश्चाद् अन्यो द्वितीयः कश्चिल्लक्ष्यते।" इति श्रुत्वा व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रो भयाकुलोचित्तो नष्टः। "निजबुद्ध्या विमुक्ता सा भयाद् व्याघ्रस्य भामिनी। अन्योऽपि बुद्धिमाँल्लोके मुच्यते महतो भयात्" भयाकुलं व्याघ्रं दृष्ट्वा कश्चित् धूर्तः श्रृगालः हसन् आह- "भवान् कुतः भयात् पलायितः?"

**अ) एकपदेन उत्तरत**- ½ × 4 = 2

क) अयमेकस्तावद्विभज्य किं क्रियताम्?

ख) कः भयाकुलोचित्तो नष्टः।?

ग) निजबुद्ध्या कस्य भयाद् सा भामिनी विमुक्ता ?

घ) सा धाष्ट्यात् कौ चपेटया प्रहृत्य जगाद?

**आ) पूर्णवाक्येन उत्तरत**- 1 × 1 = 1

क) धूर्तः शृगालः हसन् किम् आह?

**इ) यथानिर्देशम् उत्तरम् उत्तरपुस्तिकायां लिखत-** 1 × 2 = 2

क) 'स्त्री' इत्यर्थे गद्यांशे किं पदं प्रयुक्तम् ?

ख) "गच्छन्तम्" इत्यस्य विलोमपदं गद्यांशात् चित्वा लिखत?

11. **अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-**

हरिततरुणां ललितलतानां माला रमणीया
कुसुमावलिः समीरचालिता स्यान्मे वरणीया।
नवमालिका रसालं मिलिता रुचिरं संगमनम्॥

**I) एकपदेन उत्तरत-** ½ × 2 = 1

(i) कीदृशानां वृक्षाणां माला रमणीया भवेत्?

(ii) लतानां माला कीदृशी भवेत्?

**II. पूर्णवाक्येन उत्तरत-** 2 x 1 = 2

i) समीरचालिता का वरणीया स्यात्?

**III. निर्देशानुसारम् उत्तरत-(केवलं प्रश्नद्वयम्)** 1 x 2 = 2

(i) "कुसुमावलिः मे वरणीया स्यात्।" अत्र क्रियापदं किं प्रयुक्तम्?

(अ) कुसुमावलिः (ब) मे (स) स्यात् (द) वरणीया

(ii) अत्र श्लोके "चालिता" पदस्य कर्तृपदं किं प्रयुक्तम्?

(अ) कुसमैः (ब) स्यात् (स) मे (द) समीर

(iii) "आम्रम्" पदस्य पद्यांशे किं पर्यायपदं प्रयुक्तम्??

(अ) समीरम् (ब) कुसुमम् (स) रुचिरम् (द) रसालम्

12. **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत**-

व्याघ्रः - गच्छ, गच्छ जम्बुक! त्वमपि किञ्चिद् गूढप्रदेशम्। "यतो व्याघ्रमारीति या शास्त्रे श्रूयते तयाहं हन्तुमारब्धः?

शृगालः - व्याघ्र! त्वया महत्कौतुकम् आवेदितं यन्मानुषादपि बिभेषि?

व्याघ्रः - प्रत्यक्षमेव मया सात्मपुत्रावेकैकशो मामत्तुं कलहायमानौ चपेटया प्रहरन्ती दृष्टा।

जम्बुकः -स्वामिन्! यत्रास्ते सा धूर्ता तत्र गम्यताम्। व्याघ्र! तव पुनः तत्र गतस्य सा सम्मुखम् अपीक्षते यदि, तर्हि त्वया अहं हन्तव्यः इति।

व्याघ्रः - शृगाल! यदि त्वं मां मुक्त्वा यासि तदा वेलाप्यवेला स्यात्?

जम्बुकः-यदि एवं तर्हि मां निजगले बद्ध्वा चल सत्वरम्। सः व्याघ्रः तथा कृत्वा काननं ययौ। शृगालेन सहितं पुनरायान्तं व्याघ्रं दूरात् दृष्ट्वा बुद्धिमती चिन्तितवती जम्बुकमाक्षिपन्त्यङ्गुल्या तर्जयन्ती उवाच-

"रे रे धूर्त त्वया दत्तं मह्यं व्याघ्रत्रयं पुरा।
विश्वास्याद्यैकमानीय कथं यासि वदाधुना।"

**I. एकपदेन उत्तरत-** ½ x 2 = 1

(i) 'गच्छ, गच्छ जम्बुक!' इति कः वदति?

(ii) सः व्याघ्रः तथा कृत्वा कुत्र ययौ?

**II. पूर्णवाक्येन उत्तरत-** 2 x 1 = 2

(i) बुद्धिमती जम्बुकमाक्षिपन्त्यङ्गुल्या तर्जयन्ती किम् उवाच ?

**III. निर्देशानुसारम् उत्तरत-** 1 x 2 = 2

(i) 'स्वामिन्!' इति सम्बोधनपदं कस्मै प्रयुक्तम्?

(अ) बुद्धिमत्यै (ब) जम्बूकाय (स) व्याघ्राय

(ii) 'शीघ्रम्' इति अव्ययपदस्य अर्थे नाट्यांशे किम् पदं प्रयुक्तम् ?

**13. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत-(केवलं ५)** 1 x 5 = 5

i) शकटीयानं **<u>कज्जलमलिनं</u>** धूमं मुञ्चति।

अ) किम् (ब) कीदृशम् (स) कम् (द) का

ii) **<u>सुराधिप:</u>** ताम् अपृच्छत्।

अ) क: (ब) कम् (स) का (द) किम्

iii) **<u>व्याघ्रं</u>** दृष्ट्वा धूर्तः श्रृगालः अवदत्।

अ) केषाम् (ब) कम् (स) किम् (द) कस्मिन्

iv) अयम् **अन्येभ्यो** दुर्बल:।

अ) कस्मै (ब) काभ्याम् (स) कयो: (द) केभ्य:

v) स: **कृच्छ्रेण** भारम् उद्वहति।

अ) केन (ब) कस्मात् (स) कासु (द) कया

vi) **<u>सहस्राधिकेषु</u>** पुत्रेषु सत्स्वपि सा दु:खी आसीत्।

(अ) कस्मिन् (ब) केषु (स) कतिषु (द) कानि

**14. अधोलिखितश्लोकस्य अन्वयं पूरयत**- ½ × 4 = 2

वायुमण्डलं भृशं दूषितं न हि निर्मलं जलम्।
कुत्सितवस्तुमिश्रितं भक्ष्यं समलं धरातलम्॥
करणीयं बहिरन्तर्जगति तु बहु शुद्धीकरणम्। शुचि . . .

**अन्वयः**- वायुमण्डलं (i) .......... दूषितं (जातम्) (ii)......... निर्मलं न हि, भक्ष्यं कुत्सितवस्तुमिश्रितं समलं (iii)......जगति तु अन्त: बहि: (iv) .......(निर्मलं) शुद्धिकरणम् करणीयम्(भवेत्)। शुचि..

<u>अथवा</u>-

**अधोलिखितश्लोकस्य भावार्थं मञ्जूषातः उचितपदानि चित्वा पूरयत**-

रे रे धूर्त! त्वया दत्तं मह्यं व्याघ्रत्रयं पुरा।
विश्वास्याद्यैकमानीय कथं यासि वदाधुना॥

**भावार्थः** – हे दुष्ट! (i) ............त्वं पूर्वं (ii)............ त्रीन् व्याघ्रान् (iii) ........ । एवं विश्वासं दापयित्वा अधुना (iv).......... एव व्याघ्रम् आनीय कथं गच्छसि? अधुना वद।

मञ्जूषा-अयच्छत्(दत्तवान्), मह्यम्, एकम्, श्रृगाल!

**15. अधोलिखितवाक्यानि घटनाक्रमानुसारेण पुनः लेखनीयानि-** ½ x 8 = 4

(i) व्याघ्रः व्याघ्रमारी इयमिति मत्वा पलायितः।

(ii) प्रत्युत्पन्नमतिः सा शृगालम् आक्षिपन्ती उवाच।

(iii) जम्बुक-कृतोत्साहः व्याघ्रः पुनः काननम् आगच्छत्।

(iv) मार्गे सा एकं व्याघ्रम् अपश्यत्।

(v) व्याघ्रं दृष्ट्वा सा पुत्रौ ताडयन्ती उवाच-अधुना एकमेव व्याघ्रं विभज्य भुज्यताम्।

(vi) बुद्धिमती पुत्रद्वयेन उपेता पितुर्गृहं प्रति चालिता।

(vii) "त्वं व्याघ्रत्रयम् आनयतु" प्रतिज्ञाय एकमेव आनीतवान्।

(viii) गलबद्धश्रृगालकः व्याघ्रः पुनः पलायितः।

**16. वाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारम् उचितम् अर्थं चिनुत-(केवलं ४)** 1 x 5 = 5

i) वायुमण्डलं **भृशं** दूषितम्।

अ) स्वल्पम् (ब) अत्यधिकम् (स) किञ्चित् (द) अल्पम्

ii) तदा **वेला** अपि अवेला स्यात्।

अ) असमय: (ब) बेलन (स) कला (द) समय:

iii) मार्गे गहन-**कानने** एकं व्याघ्रं ददर्श।

अ) वने (ब) मार्गे (स) मन्दिरे (द) कूपे

iv) सुरभे: वचनं श्रुत्वा **आखण्डल:** दु:खित: अभवत्।

अ) अग्नि: (ब) वरुण: (स) देव: (द) इन्द्र:

v) मां निजगले बद्ध्वा चल **सत्वरम्**।

अ) मन्दम् (ब) सत्त्वम् (स) शीघ्रम् (द) मन्दिरम्